# A-II/1/1335/21

## तृतीयसत्रार्द्धम्

## प्रथमपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. दोषसामान्यलक्षणं किम्?
2. परुषवर्णतया दुष्टत्वे कः दोषः?
3. च्युतसंस्कृतिलक्षणं किम्?
4. 'तथा मन्ये दैवतोऽस्य' इत्यत्र कः दोषः?
5. पदगत-निहतार्थस्य लक्षणं किम्?
6. 'उत्फुल्लकमलकेसर' इत्यादौ कः दोषः?
7. केवले शास्त्रे प्रसिद्धश्चेत् किं भवति?
8. पदगतक्लिष्टत्वदोषस्य लक्षणं किम्?
9. 'सुधाकरकराकार' इत्यादौ कः दोषः?
10. हतवृत्तं कतिविधम्?
11. 'उदेति सविता ताम्रः' इत्यादिना किम् उपपाद्यते?

**अथवा**

'ते हिमालयमामन्त्र्य' इत्यादौ कः दोषः?

12. 'अत्र त्वं शब्दानन्तरं चकारो युक्तः' कस्य दोषस्य प्रसङ्गे?

**अथवा**

राममन्मथशरेण ताडिता इत्यादौ कः दोषः?

13. प्रसिद्धिविरुद्धः कीदृशः दोषः?

**अथवा**

'मात्सर्यमुत्सार्य' इत्यादौ कथं दोषः?

14. जघनकाञ्चीत्यादि कुतो न क्रियते ?

**अथवा**

तं सन्तं के उपकुर्वन्ति ?

15. वामनमते शब्दार्थगुणाः कति ?

**अथवा**

समवायवृत्त्या शौर्यादयः इति कस्य मतम् ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अप्रयुक्तम् असमर्थम् इत्यनयोः भेदं निरूपयत।

17. 'नेयार्थम्' सोदाहरणं निरूपयत।

18. विरुद्धमतिकृतत्त्वं सोदाहरणं निरूपयत।

**अथवा**

पदगतम् अविमृष्टविधेयांशं निरूपयत।

19. माधुर्यगुणं सोदाहरणं प्रतिपादयत।

**अथवा**

प्रसादगुणं सोदाहरणं निरूपयत।

20. गुणालङ्कारयोः भेदं यथाग्रन्थं स्पष्टयत।

**अथवा**

गुणस्वरूपं विवेचयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. यत्तदोः सम्बन्धं यथाग्रन्थं विवेचयत।

**अथवा**

रसदोषान् निरूपयत।

**अथवा**

'त्रयस्ते न पुनर्दश' यथाग्रन्थं विवेचयत।

# A-II/2/1336/21

## तृतीयसत्रार्द्धम्

## द्वितीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. अविवक्षितवाच्यस्य ध्वनेः अपरं नाम किम्?
2. 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्।' इति कस्य ध्वनेः उदाहरणम्?
3. 'धरणीधारणायाधुना त्वं शेषः।' इत्यत्र कः व्यङ्ग्यार्थः?

**अथवा**

'सज्जयति सुरभिमासो न तावदर्पयति अनङ्गाय शरान्।' इति वाक्यार्थः कम् अर्थं सूचयति?

4. अलक्ष्यक्रमव्यङ्ग्यो ध्वनिः कुत्र कुत्र दीप्यते?
5. सङ्घटना कतिधा उदिता?
6. ये अङ्गिनं रसम् अवलम्बन्ते ते के स्मृताः?

**अथवा**

अव्युत्पत्तिकृतो दोषः कथं न लक्ष्यते?

7. 'यो यः शस्त्रं बिभर्ति' इत्यादौ किम् अचारुत्वम्?
8. सङ्घटनानियमनहेतुः वक्ता कः?
9. सर्वरससाधारणः सर्वसङ्घटनासाधारणश्च को गुणः?

**अथवा**

सन्धिसन्ध्यङ्गघटनं कया दृष्ट्या विधेयम्?

10. सिद्धरसप्रख्याः के सन्ति?
11. 'तत्राप्यसौ तापसः' इत्यत्र कयोः व्यञ्जकत्वम्?
12. 'अपसर रोदितुमेवनिर्मिते मा पुंसय हते अक्षिणी मे।' इत्यादि पद्ये कस्य व्यञ्जकत्वम्?

**अथवा**

प्रबन्धे मुक्तके वापि रसादीन् बन्द्धुमिच्छता कस्मिन् यत्नः कार्यः?

13. कवेः महान् अपशब्दः कः?

14. वाच्यव्यङ्ग्यप्रतीत्योः कः न्यायः?

15. व्यञ्जकत्वस्य आश्रयौ कौ?

**अथवा**

कस्यमते औत्पत्तिकः शब्दार्थसम्बन्धः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अर्थान्तरसङ्क्रमितवाच्यध्वनेः पदप्रकाशता सोदाहरणं प्रतिपादनीया।

17. 'पदानामपि व्यञ्जकत्वमुखेन व्यवस्थितो ध्वनिव्यवहारो न विरोधी।' इत्यंशस्य सविस्तरं व्याख्यां कुरुत।

**अथवा**

तन्नियमे हेतुरौचित्यं वक्तृवाच्ययोः। इति कारिकांशं व्याख्यात।

18. 'अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम्।' इति सुविशदं व्याख्यात।

19. संलक्ष्यक्रमव्यङ्ग्यस्य ध्वनेः प्रबन्धे रसादिव्यञ्जकतां निरूपयत।

**अथवा**

रसन्तरसमावेशः प्रस्तुतस्य रसस्य यः। नोपहन्त्यङ्गितां सोऽस्य स्थायित्वेनावभासिनः॥

–इति कारिकां व्याख्यात।

20. 'न च पदार्थवाक्यार्थन्यायो वाच्यव्यङ्ग्ययोः।' इति विशदं व्याख्यात।

**अथवा**

अविवक्षितवाच्यस्य लक्षणामूलध्वनेः गुणवृत्तितो भेदं प्रतिपादयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. 'प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम्।' इति सविस्तरं विमृशत।

**अथवा**

काव्यप्रकाराणां विषयगतमौचित्यं सङ्घटनानियामकमिति विषयमाश्रित्यं निबन्धो लेख्यः।

**अथवा**

आनन्दवर्धनस्य संक्षेपेण परिचयं प्रदाय ध्वन्यालोकस्य तृतीयोद्योतेपठितं विषयवस्तु उपन्यस्यत।

# A-II/3/1337/21

## तृतीयसत्रार्द्धम्

## तृतीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. 'कादम्बिनी' इत्यस्य विवक्षितः अर्थः कः?
2. कस्य लीलया पाषाणादपि पीयूषं स्यन्दते?
3. काव्यलक्षणे 'शब्दः' इति पदस्य अप्रयोगे को दोषः?

**अथवा**

का नाम रमणीयता?

4. 'पुत्रस्ते जातः' 'धनं ते दास्यामि' इति वाक्ययोः कथं न काव्यत्वम्?
5. प्राचां मम्मटभट्टानां काव्यलक्षणं किम्?
6. एकतरपक्षपातिनी युक्तिः का कथ्यते?

**अथवा**

काव्यत्वं शब्दार्थयोः व्यासज्यवृत्ति चेत् को दोषः?

7. साहित्यदर्पणे निर्णीतं काव्यलक्षणं किम्?
8. का नाम प्रतिभा?
9. 'गुणीभावितात्मानौ' इत्यस्य कोऽभिप्रायः?

**अथवा**

कीदृशं व्यङ्ग्यं चमत्कारित्वेन आलङ्कारिकाः स्वीकुर्वन्ति?

10. किं नाम अनुमानम्?
11. 'घूर्णिताऽऽसीत्' इत्यनेन कोऽर्थः प्राधान्येन व्यज्यते?
12. 'प्रियपाणिं मन्दमाक्षिपति।' इत्यत्र मन्दाक्षेपेण कः स्थायी केन रूपेण व्यज्यते?

**अथवा**

चित्रमीमांसायाः रचयिता कः?

13. व्यक्तिविवेककारः कः?

14. अधमत्वं कथं भवति?

15. लक्षणामूलध्वनिः कतिविधः?

**अथवा**

'ताटस्थ्येन रसप्रतीतावनास्वाद्यत्वम्।' इति कस्य मतम्?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. रसगङ्गाधरस्य मङ्गलाचरणश्लोकं लिखित्वा व्याख्यात।

17. ग्रन्थोक्तदिशा पण्डितराजस्य विद्याजन्मपरम्परयोः वैशिष्ट्यं वर्णयत।

**अथवा**

रसगङ्गाधरोक्तं काव्यलक्षणं विमृशत।

18. 'न च संयोगाभाववान् वृक्षः संयोगीतिवदंशभेदेन दोषरहितं दुष्टमिति व्यवहारे बाधकं नास्तीति वाच्यम्।' -इति सविशदं व्याख्यात।

19. मध्यमकाव्यं सोदाहरणं लक्षयत।

**अथवा**

"राघवविरहज्वाला-सन्तापितसह्यशैलशिखरेषु।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय॥"
-इति पद्यं सप्रसङ्गं व्याख्याय व्यङ्ग्यकमनीयतां दर्शयत।

20. मम्मटसम्मतं काव्यस्य त्रिप्रकारत्वं पण्डितराजदिशा निराकुरुत।

**अथवा**

रसविषयकं नव्यमतम् उपस्थापयत।

**स. एकः दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. रसगङ्गाधरस्य वैशिष्ट्यमधिकृत्य निबन्धं रचयत।

**अथवा**

रसगङ्गाधरोक्तान् काव्यलक्षणपरिष्कारान् सविस्तरं व्याख्यात।

**अथवा**

अभिनवगुप्तादिसम्मतं रसस्वरूपं सविस्तरम् उपस्थापयत।

# A-II/4/1338/21

## तृतीयसत्रार्द्धम्

## चतुर्थपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. मङ्गलपद्ये 'महिमा' इति पदं किं बोधयति ?

2. केषां संस्तव: गौरवाय ?

3. व्यक्तिविवेकस्य अधिकारी क: ?

**अथवा**

व्यक्तिविवेकग्रन्थे 'ध्वनिलक्षणाक्षेप:' नाम कतम: विमर्श: ?

4. 'अन्यपरत्वम्' इति पदस्य कोऽर्थ: ?

5. सुखस्य ज्ञानं केन प्रमाणेन भवति ?

6. 'व्यक्तिविवेक:' इति कस्य ग्रन्थस्य खण्डनं विदधाति ?

**अथवा**

व्यक्तिविवेकग्रन्थस्य प्रसिद्धा व्याख्या का ?

7. 'सुवर्णपुष्पां पृथिवीम्' इत्यत्र व्यक्तिविवेकारेण क: दोष: प्रदर्शित: ?

8. क: अनुकार्यशब्द: ? स च कतिविध: ?

9. कानि सत्त्वप्रधानानि ?

**अथवा**

वाच्योऽनुमेयश्च क: ?

10. अनुमानप्रसङ्गे साधनस्य कानि त्रीणिरूपाणि भवन्ति ?

11. उपसर्गादौ द्योत्यद्योतकभावभ्रमस्य कारणं किम् ?

12. पदं कतिविधम् ?

**अथवा**

प्रमाशब्दस्य कोऽर्थ: ?

13. असिद्धविधेयस्य उपपादनं केन न्यायेन भवति ?

14. महिमभट्टमते अर्थान्तरसंक्रमितशब्दस्य कोऽर्थः ?

15. अत्यन्ततिरस्कृतवाच्यः पदार्थोपचारो वाक्यार्थोपचारो वा ?

**अथवा**

'राज्ञः पुरुषः' इत्यत्र प्रतियोगी कः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. महिमभट्टदिशा उपसर्गाणां वाचकत्वं साधयत।

17. व्यक्तिविवेकस्य मङ्गलपद्यं व्याख्यात।

**अथवा**

'किन्तु तदवधीर्यार्यैः' इति श्लोकः व्याख्येयः।

18. घटप्रदीपन्यायेन काव्ये व्यङ्ग्यव्यञ्जकभावः कथं न सम्भवति ?

19. उपसर्ग-निपात-कर्मप्रवचनीयेषु किं साम्यं किं च वैषम्यमिति प्रतिपादयत।

**अथवा**

ध्वनिलक्षणे 'सूरिभिः कथितः' इति स्थले महिमभट्टदिशा दोषमुद्भावयत।

20. घटनक्रियायाः स्वरूपं प्रतिपाद्य तस्या एव प्रवृत्तिनिमित्तत्वं साधयत।

**अथवा**

'तत्परत्वं न वाच्यस्य नासौ मार्गो ध्वनेर्मतः' इत्यस्य व्याख्या कार्या।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. अलङ्कारशास्त्रे व्यक्तिविवेकस्य महत्त्वमुपपादयत।

**अथवा**

'भ्रान्तिरपि सम्बन्धतः प्रमा' इति सोदाहरणमालोचयत।

**अथवा**

व्यक्तिविवेककारदृशा प्रमाणानां त्रैविध्यं विवेचयत।

# A-II/5/1339/21

## तृतीयसत्रार्द्धम्

## पञ्चमपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. नाट्यशास्त्रस्य रचयिता क:?
2. काव्यशास्त्रस्य षड्प्रस्थानानां नामानि लिखत।
3. कुन्तको..................काव्यजीवितमिति मन्यते। (रिक्तस्थानं पूरयत)

**अथवा**

'द्वा सुपर्णा सयुजा सखाया' इत्येतत् कस्मिन् वेदे लभ्यते?

4. मम्मटाचार्योक्तं काव्यलक्षणं लिखत।
5. भामह: कस्मिन् स्थाने जनिमलभत।
6. अलंकार: नाम क:?

**अथवा**

कुवलयानन्द: कस्य रचना?

7. आचार्यस्य भरतस्य रससूत्रं लिखत।
8. आचार्यस्य कुन्तकस्य सिद्धान्त: क:?
9. 'लोचनम्' इति कस्य ग्रन्थस्य व्याख्या?

**अथवा**

पीयूषवर्ष: इति कस्य अपरं नाम?

10. काव्यादर्श: केन प्रणीत:?
11. उपरूपकाणि कति सन्ति?
12. काव्यप्रकाशस्य सप्तमे उल्लासे कति दोषा: प्रतिपादिता: सन्ति?

**अथवा**

दशरूपके कति प्रकाशा: सन्ति?

13. काव्यदोषाः के भवन्ति ?

14. आचार्यो भरतः कति अलंकारान् स्वीकरोति ?

15. रसार्णवसुधाकरः केन प्रणीतः ?

**अथवा**

रसविषये किन्नाम भट्टनायकस्य वादः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. गुणीभूतव्यंग्यकाव्यं विस्तरेण वर्णयत।

17. राजानकमहिमभट्टविरचितस्य व्यक्तिविवेकस्य संक्षिप्तं परिचयं लिखत।

18. वामनमते विशेषोक्तेः लक्षणम् उपस्थापयत।

**अथवा**

दण्डिनः परिचयं विस्तरेण लिखत।

19. चन्द्रालोकस्य वर्ण्य-विषयं वर्णयत।

**अथवा**

काव्यभेदविचारं स्वशब्दैः प्रकटयत।

20. काव्यप्रकाशे निर्दिष्टाः काव्यहेतवः वर्णनीयाः।

**अथवा**

सरस्वतीकण्ठाभरणं परिचाययत।

**स. अधोलिखितेषु एकं निबन्धं लिखत।** **(1×20=20)**

21. ध्वनिसम्प्रदायः।

**अथवा**

औचित्यसम्प्रदायः।

**अथवा**

आचार्यो मेधावी।